

# श्री रुद्रं लघुन्यासम्-ॐ अथात्मानगं शिवात्मानग्

https://www.chalisa.online

|| श्री रुद्रं लघुन्यासम् ||

ॐ अथात्मानगं शिवात्मानग् श्री रुद्ररूपं ध्यायेत् ॥
शुद्धस्फटिक संकाशं त्रिनेत्रं पंच वक्त्रकं ।
गंगाधरं दशभुजं सर्वाभरण भूषितम् ॥
नीलग्रीवं शशांकांकं नाग यज्ञोप वीतिनम् ।
व्याघ्र चर्मोत्तरीयं च वरेण्यमभय प्रदम् ॥
कमंडल्-वक्ष सूत्राणां धारिणं शूलपाणिनं ।
ज्वलंतं पिंगलजटा शिखा मुद्द्योत धारिणम् ॥
वृष स्कंध समारूढं उमा देहार्थ धारिणं ।
अमृतेनाप्लुतं शांतं दिव्यभोग समन्वितम् ॥
दिग्देवता समायुक्तं सुरासुर नमस्कृतं ।
नित्यं च शाश्वतं शुद्धं ध्रुव-मक्षर-मव्ययम् ।
सर्व व्यापिन-मीशानं रुद्रं वै विश्वरूपिणं ।
एवं ध्यात्वा द्विजः सम्यक् ततो यजनमारभेत् ॥

अथातो रुद्र स्नानार्चनाभिषेक विधिं व्याक्ष्यास्यामः । आदित एव तीर्थे स्नात्वा उदेत्य शुचिः प्रयतो ब्रह्मचारी शुक्लवासा देवाभिमुखः स्थित्वा आत्मनि देवताः स्थापयेत् ॥

प्रजनने ब्रह्मा तिष्ठतु । पादयोर्-विष्णुस्तिष्ठतु । हस्तयोर्-हरस्तिष्ठतु । बाह्वोरिंद्रस्तिष्टतु । जठरेऽअग्निस्तिष्ठतु । हृदये शिवस्तिष्ठतु । कंठे वसवस्तिष्ठंतु । वक्त्रे सरस्वती तिष्ठतु । नासिकयोर्-वायुस्तिष्ठतु । नयनयोऽ-चंद्रादित्यौ तिष्टेतां । कर्णयोरश्विनौ तिष्टेतां । ललाटे रुद्रास्तिष्ठंतु । मूर्ध्न्यादित्यास्तिष्ठंतु । शिरसि महादेवस्तिष्ठतु । शिखायां वामदेवास्तिष्ठतु । पृष्ठे पिनाकी तिष्ठतु । पुरतः शूली तिष्ठतु । पार्श्ययोः शिवाशंकरौ तिष्ठेतां । सर्वतो वायुस्तिष्ठतु । ततो बहिः सर्वतोऽग्निर्-ज्वालामाला-परिवृतस्तिष्ठतु । सर्वेष्वंगेषु सर्वा देवता यथास्थानं तिष्ठंतु । मागं् रक्षंतु ।

अग्निर्मे वाचि श्रितः । वाग्धृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि वायुर्मे प्राणे श्रितः । प्राणो हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । सूर्यो मे चक्षुषि श्रितः । चक्षुर्-हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । चंद्रमा मे मनसि श्रितः । मनो हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । दिशो मे श्रोत्रे श्रिताः । श्रोत्रगं् हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । आपोमे रेतसि श्रिताः । रेतो हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । पृथिवी मे शरीरे श्रिताः । शरीरगं् हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । ओषधि वनस्पतयो मे लोमसु श्रिताः । लोमानि हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । इंद्रो मे बले श्रितः । बलगं् हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । पर्जन्यो मे मूर्द्नि श्रितः । मूर्धा हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । ईशानो मे मन्यौ श्रितः । मन्युर्-हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । आत्मा म आत्मनि श्रितः । आत्मा हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि । पुनर्म आत्मा पुनरायु रागात् । पुनः प्राणः पुनराकूतमागात् । वैश्वानरो रश्मिभिर्-वावृधानः । अंतस्तिष्ठत्वमृतस्य गोपाः ॥

अस्य श्री रुद्राध्याय प्रश्न महामंत्रस्य, अघोर ऋषिः, अनुष्टुप् छंदः, संकर्षण मूर्ति स्वरूपो योऽसावादित्यः परमपुरुषः स एष रुद्रो देवता । नमः शिवायेति बीजं । शिवतरायेति शक्तिः । महादेवायेति कीलकं । श्री सांब सदाशिव प्रसाद सिद्ध्यर्थे जपे विनियोगः ॥

ॐ अग्निहोत्रात्मने अंगुष्ठाभ्यां नमः । दर्शपूर्ण मासात्मने तर्जनीभ्यां नमः । चातुर्-मास्यात्मने मध्यमाभ्यां नमः । निरूढ पशुबंधात्मने अनामिकाभ्यां नमः । ज्योतिष्टोमात्मने कनिष्ठिकाभ्यां नमः । सर्वक्रत्वात्मने करतल करपृष्ठाभ्यां नमः ॥

अग्निहोत्रात्मने हृदयाय नमः । दर्शपूर्ण मासात्मने शिरसे स्वाहा । चातुर्मास्यात्मने शिखायै वषट् । निरूढ पशुबंधात्मने कवचाय हुं । ज्योतिष्टोमात्मने नेत्रत्रयाय वौषट् । सर्वक्रत्वात्मने अस्त्रायफट् । भूर्भुवस्सुवरोमिति दिग्बंधः ॥

ध्यानं

आपाताल-नभःस्थलांत-भुवन-ब्रह्मांड-माविस्फुरत्-
ज्योतिः स्फाटिक-लिंग-मौलि-विलसत्-पूर्णेंदु-वांतामृतैः ।
अस्तोकाप्लुत-मेक-मीश-मनिशं रुद्रानु-वाकांजपन्
ध्याये-दीप्सित-सिद्धये ध्रुवपदं विप्रोऽभिषिंचे-च्चिवम् ॥
ब्रह्मांड व्याप्तदेहा भसित हिमरुचा भासमाना भुजंगैः
कंठे कालाः कपर्दाः कलित-शशिकला-श्चंड कोदंड हस्ताः ।
त्र्यक्षा रुद्राक्षमालाः प्रकटितविभवाः शांभवा मूर्तिभेदाः
रुद्राः श्रीरुद्रसूक्त-प्रकटितविभवा नः प्रयच्चंतु सौख्यम् ॥

ॐ गणानाम् त्वा गणपतिगं् हवामहे कविं कवीनामुपमश्रवस्तमं । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पद आ नः शृण्वन्नूतिभिस्सीद सादनं ॥ महागणपतये नमः ॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यंता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे ॥

ॐ शांतिः शांतिः शांतिः ॥

|| https://www.chalisa.online ||